# Namarthavivekah

# નામાર્થવિવેકઃ

## Document Information

Text title : Namarthavivekah by Upanishadbrahmayogi

File name : nAmArthavivekaH.itx

Category : raama, rAma

Location : doc_raama

Author : Upanishad Brahmayogin

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Latest update : October 21, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 21, 2025

*sanskritdocuments.org*

# નામાર્થવિવેકઃ

સ્વાવિદ્યાપદતત્કાર્યજાતારોપાપવાદધીઃ ।
યસ્મિન્ વિરામમગમત્ તત્ત્રિપાદસ્મિ રામચિત્ ॥ ૧॥

ગુરું નત્વા બ્રહ્મમાત્રાવશેષસુત્વમિચ્છતામ્ ।
તત્પ્રાપ્ત્યુપાયદિવ્યશ્રીરામનામાર્થ ઉચ્યતે ॥ ૨॥

દેદીપ્યમાનરૂપત્વાદ્ દિવ્યશ્રીર્મુક્તિરીરિતા ।
તદ્રૂપતો રાજમાનં મહઃ શ્રીરામ ઈરિતમ્ ॥ ૩॥

શ્રીરામ એવ નામ સ્યાન્નાભિધાનમુપેયતઃ ।
ઉપેયરૂપાવસ્થાનં નામાર્થ ઇતિ વિશ્રુતમ્ ॥ ૪॥

વિષયઃ સ્વેતરગ્રાસસત્તાસામાન્યમીરિતઃ ।
પ્રયોજનં બ્રહ્મમાત્રાવશેષણતયા સ્થિતિઃ ॥ ૫॥

સમ્બન્ધઃ પ્રતિપાદ્યાદિઃ શાસ્ત્રચિન્માત્રયોર્મિથઃ ।
વિકલેબરકૈવલ્યાનન્દકામોઽધિકાર્યસૌ ॥। ૬॥

ઉક્તાધિકારસમ્પન્નયોગિનોપેયનામચિત્ ।
સ્વાવશેષતયાવાપ્તું શક્યા સ્યાત્ સ્વસ્વરૂપતઃ ॥ ૭॥

આપ્તિઃ સ્વમાત્રાવશેષો ન હિ ગ્રામાન્તરાપ્તિવત્ ।
નિર્બીજબ્રહ્મવિજ્ઞાનાન્નિર્વાજાપ્તિઃ શ્રુતીરિતા ॥ ૮॥

અનાદિકાલમારભ્ય સ્વાવિદ્યાપલ્લ્યાવધિ ।
નામરૂપભિદાશોભિ નાનાબ્રહ્માણ્ડગર્ભિતમ્ ॥ ૯॥

વિરાડ્ઢિરણ્યગર્ભેશચિત્સામાન્યૈરધિષ્ઠિતમ્ ।
તત્તદણ્ડોચિતબ્રહ્મવિષ્ણુરુદ્રાદ્યુતાન્વિત્તમ્ ॥ ૧૦॥

વિચિત્રકર્માવરણપુણ્યપાપભ્રમોજ્જ્વલમ્ ।
નાનાવિધપ્રાણિજાતજુષ્ટમાવિદ્યકં પદમ્ ॥ ૧૧॥

વિશેષસામાન્યયુક્તં સત્યત્વેનાનુભૂયતે ।
તથા સતિ કથં નિર્વિશેષજ્ઞાનં નૃણાં ન તત્ ॥ ૧૨॥

ઉપેયોપાયભેદેન નામચિદ્ દ્વિવિધેરિતા ।
તત્રોપેયનામ સત્તાસામાન્યમભિધીયતે ॥ ૧૩॥

નામાભિધાનં નામિ ચિદભિધેયં તયોર્ન ભિત્ ।
એવં જ્ઞાનવિભાતં યદુપાયાભિધનામ તત્ ॥ ૧૪॥

ન હ્યુપાયં વિનોપેવમાપ્તું શક્યં મનીષિભિઃ ।
તસ્માદુપાયસર્વસ્વં જ્ઞાત્વાનુષ્ઠાનતઃ પરમ્ ॥ ૧૫॥

યજ્જન્મ ચરમં તત્રોપેયનામ ચિદાત્મકમ્ ।
ઉપેયશ્રીરામનામતયા વિદ્વાન્ વિશિષ્યતે ॥ ૧૬॥

સ્વાવિદ્યાપદતત્કાર્યભ્રમારૂઢાધિકારિણામ્ ।
સ્વાન્તઃકરણમાલિન્યદોષેણોપાયનામચિત્ ॥ ૧૭॥

ચતુર્ધા ભિદ્યતે સ્થૂલસૂક્ષ્મબીજતુરીયતઃ ।
યસ્યાન્તઃકરણં ભૂરિપાપેન કબલીકૃતમ્ ॥ ૧૮॥

સ ચોપાયસ્થૂલનામ સ્મરેદઘવિમુક્તયે ।
સ્વાવિદ્યાપદવીનાશયોગવૈરાજરૂપતઃ ॥ ૧૯॥

રાજમાનં મહો રામનામ સ્થૂલચિદુચ્યતે ।
સત્ત્વસત્તતમોપાધિં સર્વતઃ પાણિમસ્તકમ્ ॥ ૨૦॥

રામં વૈશ્વાનરં ધ્યાત્વા રામરામેતિ સર્વદા ।
લજ્જાં હિત્વા સ્મરણતઃ સર્વપાપક્ષયો ભવેત્ ॥ ૨૧॥

સદા રામેતિ નામૈવ સ્મરતામઘસઞ્ચયમ્ ।
નિઃશેષં નાશયિત્વાથ ક્રમમુક્તિં વિધાસ્યતિ ॥ ૨૨॥

સ્વાન્તઃકરણસમ્ભૂતસઞ્ચિતાઘનિવૃત્તયે ।
સર્વવર્ણૈરાશ્રમિભિઃ સ્મર્તવ્યં નામ સર્વદા ॥ ૨૩॥

નામ કીર્તયતઃ પુંસો નાસ્તિ પાતકમણ્વપિ ।
ગૃહ્ણામિ તપ્તાયઃપિણ્ડમહિભાણ્ડે કરેં ક્ષિપે ॥ ૨૪॥

નામસ્મર્તુરપાપિત્વાદકાર્યે ન ભવેન્મતિઃ ।
નામાપરાધદશકં તં દ્રષ્ટું વા કથં શકમ્ ॥ ૨૫॥

યદિ સ્પૃશેત્ પ્રમાદેન નામ તન્નાશયેત્તરામ્ ।
ગાણપત્યશૈવશાક્તસૌરવૈષ્ણવનામસુ ॥ ૨૬॥

રામનામ્નઃ ફલાધિક્યમાહુસ્તારકરૂપતઃ ।
રામ એવ પરં બ્રહ્મ રામ એવ પરં તપઃ ॥ ૨૭॥

રામ એવ પરં તત્ત્વં શ્રીરામો બ્રહ્મ તારકમ્ ।
ઇતિ શ્રુતેસ્તચ્છ્રીરામનામતુલ્યં ન વિદ્યતે ॥ ૨૮॥

નારાયણાષ્ટાક્ષરે તુ રામનામાદ્યવર્ણકમ્ ।
ન યોજિતં યદિ તદા નાયનાય મનુર્ભવેત્ ॥ ૨૯॥

દિવ્યશ્રીશિવપઞ્ચાર્ણે રામનામાન્ત્યવર્ણકમ્ ।
ન યોજિતં યદિ તદા ન શિવાય ભવેન્મનુઃ ॥ ૩૦॥

મનુદ્વયં યદા રામનામદ્વયક્ષરયોજિતમ્ ।
તદા શિવાયાયનાય ભવત્યેવ ન સંશયઃ ॥ ૩૧॥

શિવનારાયણમનુમુક્તિદાપનશક્તિદમ્ ।
તસ્માત્ પ્રાધાન્યતો નામ સ્મરતાં મુક્તિદાયને ॥ ૩૨॥

શક્તિરસ્તીતિ કિં ચિત્રં સ્મર્તૃટન્ નામોદ્ધરેત્ ક્ષણાત્ ।
હૃદ્દેશે યેન સતતં સ્મૃતં તેન મહાત્મના ॥ ૩૩॥

સાધિતં ભગવત્તત્ત્વં તસ્ય કિં દુર્લભં ભવેત્ ।
ચરમશ્વાસવેલાયાં રામ રામેતિ યઃ સ્મરેત્ ॥ ૩૪॥

સ નિર્ધૂતાઘનિચયો સુક્તિમેતિ ન સંશયઃ ।
રામચન્દ્રેત્યેકવારમનિચ્છાસ્મૃતિમાત્રતઃ ॥ ૩૫॥

યાવન્નશ્યેત્ પાપબૃન્દં કલ્પકોટિશતૈઃ કૃતમ્ ।
તાવત્ કર્તવ્યમિત્યેવ દૃઢનિશ્ચયપૂર્વકમ્ ॥ ૩૬॥

કોટિકોટિકોટિજન્મશતેનાપિ પ્રયત્નતઃ ।
તાવત્ કર્તું સમર્થઃ કઃ સર્વજ્ઞ વદ સોઽસ્તિ ચેત્ ॥ ૩૭॥

અસ્તીત્યેવં વદસિ ચેન્નામ તે પાપઘાતુકમ્ ।
ન ભવેદ્દુર્વલત્યાત્ તત્ તદા ભવતુ મે જનિઃ ॥ ૩૮॥

નાસ્તીત્યેવં યદિ મતં સફલો મમ નિશ્ચયઃ ।

તસ્માદહં કોટિજન્મપાપબૃન્દાપનુત્તયે ॥ ૩૯॥

શ્રીરામચન્દ્ર તે નામ બુદ્ધિપૂર્વં જપન્ સ્થિતઃ ।
ત્રિવારં રામનામાશુ સ્મૃત્વા કર્મત્રયાન્વિતામ્ ॥ ૪૦॥

આવૃતિત્રયતદ્ધેતુસ્વાવિદ્યાં નાશયામ્યહમ્ ।
અસ્મિન્નર્થે પ્રમાણાનિ શ્રુતયઃ સન્તિ કોટિશઃ ॥ ૪૧॥

સ્મૃતયશ્ચ તથા ભૂરિ નિશ્ચયં યાન્તુ ભૂસુરાઃ ।
કૃતં દિને યદ્દુરિતં પક્ષમાસર્તુવર્ષજમ્ ॥ ૪૨॥

સર્વં દહતિ નિઃશેષં તૂલાચલમિવાનલઃ
બ્રહ્મહત્યાસહસ્રાણિ જ્ઞાનાજ્ઞાનકૃતાનિ ચ ॥ ૪૩॥

સ્વર્ણસ્તેયસુરાપાનગુરુતલ્પાયુતાનિ ચ ।
કોટિકોટિસહસ્રાણિ ઉપપાતકજાન્યપિ ॥ ૪૪॥

સર્વાણ્યપિ પ્રણશ્યન્તિ રામનામાનુકીર્તનાત્ ।
યત્ પ્રયાગાદિતીર્થોક્તપ્રાયશ્ચિત્તશતૈરપિ ॥ ૪૫॥

નૈવાપનોદ્યતે પાપં તદપ્યાશુ વિનાશયેત્ ।
પુણ્યક્ષેત્રેષુ સર્વેષુ કુરુક્ષેત્રાદિષુ સ્વયમ્ ॥ ૪૬॥

બુદ્ધિપૂર્વમઘં કૃત્વા તદપ્યાશુ વિનાશયેત્ ।
કૃચ્છ્રૈસ્તપ્તપરાકાદ્યૈર્નાનાચાન્દ્રાયણૈરપિ ॥ ૪૭॥

પાપં ચ નાપનોદ્યં યત્ તદપ્યાશુ વિનાશયેત્ ।
આત્મતુલ્યસુવર્ણાદિદાનૈર્બહુવિધૈરપિ ॥ ૪૮॥

કિઞ્ચિદપ્યપરિક્ષીણં તદપ્યાશુ વિનાશયેત્ ।
સદા રામોઽહમસ્મીતિ તત્ત્વતઃ પ્રવદન્તિ યે ॥ ૪૯॥

ન તે સંસારિણો નૂનં રામ એવ ન સંશયઃ ।
ચતુર્વિધા ભજન્તે માં જનાઃ સુકૃતિનોઽર્જુન ॥ ૫૦॥

ઓમિત્યેકાક્ષરં બ્રહ્મ વ્યાહરન્ મામનુસ્મરન્ ।
યઃ પ્રયાતિ ત્યજન્ દેહં સ યાતિ પરમાં ગતિમ્ ॥ ૫૧॥

સતતં કીર્તયન્તો માં યતન્તશ્ચ દૃઢવ્રતાઃ ।
નમસ્યન્તશ્ચ માં ભક્ત્યા નિત્યયુક્તા ઉપાસતે ॥ ૫૨॥

તેષામહં સમુદ્ધર્તે ત્યેવમાદિશ્રુતેઃ સ્મૃતેઃ ।
વિવશેન પ્રયત્નેન જ્ઞાનેનાજ્ઞાનતોऽપિ વા ॥ ૫૩॥

નામસ્મરણતોऽપાપો વિદ્વાનસૃતમશ્નુતે ।
મયોક્તં સકલં નાર્થવાદઃ સત્યં ન સંશયઃ ॥ ૫૪॥

શ્રીરામનામ્ન્યર્થવાદં સમ્ભાવયતિ યો નરઃ ।
સ મહાપાતકિભ્યોऽપિ વરિષ્ઠ ઇતિ કીર્તિતઃ ॥ ૫૫॥

તત્પાપશાન્તયે નામ વિનાન્યન્ન હિ વિદ્યતે ।
ઇતિ શ્રુતિસ્મૃતિશતપ્રમાણજ્ઞાનવાન્ મુનિઃ ॥ ૫૬॥

શ્રીરામસારૂપ્યમુક્તિં સાયુજ્યં વૈતિ નાન્યથા ।
યાવત્ પશ્યતિ વૈરાજરૂપં સર્વત્ર સર્વદા ॥ ૫૭॥

તાવદિત્થં સ્મરેન્નામ મનસા વચસાથવા ।
તતસ્તૂપાયસૂક્ષ્માંશનામસ્મરણધીર્ભવેત્ ॥ ૫૮॥

સ્વાવિદ્યાપદસૂક્ષ્માંશયોગસૂત્રસ્વરૂપતઃ ।
રાજમાનં મહો રામનામ સૂક્ષ્મચિદુચ્યતે ॥ ૫૯॥

સત્ત્વસત્ત્વરજોપાધિં સર્વલિઙ્ગાભિમાનિનમ્ ।
સ્વવિકલ્પિતવૈરાજતત્કાર્યગ્રાસપૂર્વકમ્ ॥ ૬૦॥

સૂત્રાત્મભાવમાપન્નં શ્રીરામં કરુણાનિધિમ્ ।
ધ્યાત્વા પૂર્વોક્તવિધયા રામનામ સદા સ્મરેત્ ॥ ૬૧॥

યાવદ્ધૃદિ બહિર્દેશે ચાન્તરાલે તયોરપિ ।
સૂત્રાખ્યશ્રીરામનામ સ્વરૂપેણ પ્રકાશતે ॥ ૬૨॥

તાવચ્છ્રીરામરામેતિ મનસા નામ સંસ્મરેત્ ।
તતસ્તૂપાયબીજાંશનામસ્મરણધીર્ભવેત્ ॥ ૬૩॥

સ્વાવિદ્યાપદબીજાંશયોગબીજસ્વરૂપતઃ ।
રાજમાનં મહો રામનામબીજચિદુચ્યતે ॥ ૬૪॥

સત્ત્વસાત્ત્વિકસત્ત્વાઙ્ગં સાર્વજ્ઞ્યાદિગુણૈર્યુતમ્ ।
સ્વકલ્પિતવિરાટ્સૂત્રપ્રપઞ્ચગ્રાસપૂર્વકમ્ ॥ ૬૫॥

બીજમાત્રતયા શિષ્ટં સર્વકારણવૈભવમ્ ।
નિર્હેતુકદયાસિન્ધું રામં ધ્યાત્વા દિવાનિશમ્ ॥ ૬૬॥

પૂર્વપર્યાયગદિતરામનામ સદા સ્મરેત્ ।
યાવચ્છ્રીરામનામાર્થઃ પ્રત્યક્પરવિભાગતઃ ॥ ૬૭॥

ભવેત્ કરામલકવત્ તાવન્નામ સ્મરેદ્ બુધઃ ।
તદર્થો રેફ આમ્નાતસ્ત્વમર્થો માર્ણ ઉચ્યતે ॥ ૬૮॥

રાર્ણેન માર્ણસંયોગો ભવેદસિપદાર્થકઃ ।
રવાચ્યમીશચૈતન્યં રલક્ષ્યં સત્યચિત્સુખમ્ ॥ ૬૯॥

મવાચ્યં જીવચૈતન્યં મલક્ષ્યં પ્રત્યગીરિતમ્ ।
વિષમોપાધિતો રામવાચ્યયોર્નૈક્યમિષ્યતે ॥ ૭૦॥

રામાર્ણવાચ્યાપવાદાધારલક્ષ્યચિદાત્મનોઃ ।
સામાનાધિકરણ્યેન તયોરૈક્યં શ્રુતીરિતમ્ ॥ ૭૧॥

આદ્યો રા તત્પદાર્થઃ સ્યાન્મકારસ્ત્વમ્પદાર્થવાન્ ।
તયોઃ સંયોજનમસીત્યર્થે તત્વવિદો વિદુઃ ॥ ૭૨॥

બ્રહ્માત્મૈવ ભવેદાત્મા બ્રહ્મૈવાત્મા ન સંશયઃ ।
એવં વિચાર્ય નામાર્થં શ્રુત્યાચાર્યપ્રસાદતઃ ॥ ૭૩॥

તતસ્તૂપાયતુર્યાંશનામાનુષ્ઠાનધીર્ભવેત્ ।
સ્વાવિદ્યાપદતુર્યાંશયોગસાક્ષિસ્વરૂપતઃ ॥ ૭૪॥

રાજમાનં મહો રામનામ તુર્યચિદુચ્યતે
ચિત્સામાન્યોપાધિલબ્ધસર્વસાક્ષિસ્વરૂપકમ્ ॥ ૭૫॥

સ્વકલ્પિતવિરાટ્સૂત્રબીજતત્કાર્યવિશ્રમમ્ ।
કબલીકૃત્ય તત્સર્વાધારત્વેનાવશેપિતમ્ ॥ ૭૬॥

સર્વોદાસીનચૈતન્યમપિ ભક્તાવનોત્સુકમ્ ।
શ્રીરામનામસામ્રાજ્યં સ્વાભેદેનૈવ ભાવયેત્ ॥ ૭૭॥

યાવત્ સમસ્તાધિષ્ઠાનસાક્ષ્યસ્મીતિ દૃઢા મતિઃ ।
સરૂપવિલયં યાતિ તાવદેવં વિભાવયેત્ ॥ ૭૮॥

શાસ્ત્રજજ્ઞાનવિજ્ઞાનસમ્યગ્જ્ઞાનપ્રભાવતઃ ।
કર્મત્રયત્ર્યાવરણભાગત્રયલયોદ્ભવમ્ ॥ ૭૯॥

વિત્ત્વં વરત્વં વર્યત્વમેત્ય સાક્ષી ભવેન્મુનિઃ ।

સર્વાધારતયા શિષ્ટસાક્ષ્યાત્મિર્યદિ રોચતે ॥ ૮૦॥

તદા તદ્રૂપેણ તિષ્ઠ સર્વાધિષ્ઠાનસાક્ષિણઃ ।
સત્તાસામાન્યાપ્તિકાલે યાસ્યસિ ત્વં પરાદ્વયમ્ ॥ ૮૧॥

ઇદાનીમિતિ -
ઇદાનીં તે યદ્યુપેયનામબ્રહ્માવશેષધીઃ ।
ભવેત્ તદોપાયનામચતુર્ભાગસમન્વિતમ્ ॥ ૮૨॥

સ્વાવિદ્યાપદતત્કાર્યજાતં શશવિષાણવત્ ।
જ્ઞાત્વાત્યન્તાસત્ત્વમિતિ નિત્યભાવસ્વરૂપકમ્ ॥ ૮૩॥

વિકલેબરકૈવલ્યોપેયનામસ્વરૂપતઃ ।
પરમાદ્વૈતરૂપેણ શિષ્યસે નાત્ર સંશયઃ ॥ ૮૪॥

નિર્બીજબ્રહ્મવિજ્ઞાનસમકાલં મહામુનિઃ ।
નિર્બીજસત્તાસામાન્યબ્રહ્મૈવ ભવતિ શ્રુતેઃ ॥ ૮૫॥

શ્રીવાસુદેવેન્દ્રશિષ્યરામચન્દ્રેન્દ્રયોગિના ।
ઉપેયશ્રીરામનામપરમાર્થો નિરૂપિતઃ ॥ ૮૬॥

ય ઇત્થં રામનામાર્થં જ્ઞાત્વા નામ સ્મરેત્ સદા ।
સ યાતિ પરમાદ્વૈતમહાસામ્રાજ્યવૈભવમ્ ।
સપ્તાશીતિગ્રન્થયુતા શ્રીનામાર્થવિવેકચિત્ ॥ ૮૭॥

ઇતિ ઉપનિષદ્બ્રહ્મયોગિવિરચિતઃ નામાર્થવિવેકઃ સમ્પૂર્ણઃ ।

Upanishadbrahmayogin ઉપનિષદ્બ્રહ્મયોગિન્ composed nAmArthavivekaH નામાર્થવિવેકઃ in verses as well as its prose commentary વ્યાખ્યા Upeya-nama-viveka ઉપેયનામવિવેકઃ (reference link is below).

The Upeya-nama-viveka is a good and authoritative treatise on Nämasiddhānta. It is a manual (prakarana) dealing with the subject (vişaya) of the glory of the recitation of Rama-naman or the name of Rama who is one of the incarnations of the Supreme. Its aim (prayojana) is to aid the devotee to realize identity with Rāma and it has relation (sambandha) to the subject of the Supreme as it portrays it. And one who desires to experience the pleasures of the Supreme Bliss is entitled to study it is an adhikarin. The treatise points out that the recitation of God's name is a means (upāya) for realizing

God (upeya) and declares that the name itself is the Supreme Being. In the course of its exposition, it defines and explains terms like upāya, upeya, sattā and Rāma-cit and builds the Nämasiddhānta doctrines on a sound and logical basis. It not only establishes the identity between Rama and Brahman on the basis of statements made in Śruti and Smrti texts but also relates the name of Rama with the state ment ’tat tvam asi’. It finally teaches that the recita-tion of the Lord’s name removes from the devotee all traces of sin and prepares his mind for cultivating the sense of identity (advaita-bhāvanā) between him-self and the Supreme: Rāmo ham aham eva Rama iti bhāvayet’.

Encoded and proofread by Mrityunjay Pandey

*Namarthavivekah*
pdf was typeset on October 21, 2025

Please send corrections to *sanskrit@cheerful.com*